Foll. 52 ; 26·5×11 cms. ; paper ; Devanāgarī script ; Sanskrit; lines per page 10; letters per line 36; 1763 V. S. (1706 A. D.); mixed folia.

Begins:— ।। श्रीगणेशाय नमः ।।

यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि ।
कुरुतेऽञ्जलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः ।।१।।

हेमाद्रिकल्पद्रुमपारिजातं ब्राह्मं खगेन्द्रं स्मृतिचन्द्रिकाञ्च ।
मिताक्षरादीन्यवलोक्य बुद्ध्या वितन्यते कल्पतरोर्लतेयम् ।।२ ।
सन्निकृष्टमरणादारभ्यौर्ध्वदैहिकं लिख्यते ।............

Ends:—तथाऽपि दरिद्रस्य मातापितृभरणार्थप्रतिग्रहे च सद्यः शुद्धिस्नानमात्रं साध्येत इत्यर्थः । दक्षिणां व्रतिनामेकैक वियः (?) सत्रिणामपि सद्यः शौचमदोषार्थः ।। सिद्धिः ।। ।।श्रीः।। ।। संवत् १७६३ वर्षे चैत्रमासे कृष्णपक्षे षष्ठीतिथौ सुरगुरुवासरे लिखितेयं कल्पद्रुमलतापद्धतिः ।।

227. Kātyāyanasūtram-Trikaṇḍikā
कात्यायनसूत्रम्-त्रिकण्डिका
Author— Kātyāyanaḥ

Foll. 3; 28·5×11 cms.; paper; Devanāgarī script ; Sanskrit; lines per page 8; letters per line 34-35; 18th c.; bears two seals of M. K. Ram Singh.

Ends: —इति कात्यायनमुनिप्रणीतं त्रिकण्डिकासूत्रं समाप्तम् ।। शुभमस्तु ।।श्रीः।। श्रीरस्तु ।। श्रीरामचन्द्रः ।।

Describes the method of taking bath.

228. Kātyāyanasnānasūtram (with ct.)
कात्यायनस्नानसूत्रम् (सटीकम्)

Author— Kātyāyanaḥ; commentator— Hariharaḥ
Foll. 12; 29·5×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 14/15; letters per line 48/50; 18th c.

Begins:— स्वस्ति श्रीगणेशाय नमः ।।

प्रणतोऽस्मि हरेरङ्घ्रिसरसीरुहमादरात् ।
यज्जगत्पावनं पाथः प्रायोष्टामरसैन्धवम् ।।१।।

कात्यायनकृतस्नानविधिव्याख्यापुरःसरं ।
विधास्ये पद्धतिं विद्वत्सदाचारद्विजप्रियाम् ।।२।।

अथ श्रौतस्मार्तक्रियाऽनुविधानाऽनन्तरम् । यतस्ताः क्रियाः स्नानविधिपूर्विकाः । अतो हेतोरहर्निशं सन्ध्योपासनं पञ्चमहायज्ञादिनित्यक्रियाऽनुष्ठानाधिकारसम्पादकत्वादावश्यकम् । स्नानं बहिः सर्वांगजलसंयोगशुद्धिं विधास्य इति सूत्रशेषः ।।

Ends:— इति कात्यायनमुनिप्रणीतं त्रिकण्डिकासूत्रम् ।

236. Kātyāyanasūtrapaddhatiḥ
कात्यायनसूत्रपद्धतिः

Author— Kātyāyanaḥ; commentator — Śrīdeva Mahāyājñikaḥ.

Foll. 108; 29·5×13 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10; letters per line 56; 18th c.

Begins:— ऐं ॐ नमः श्री सरस्वत्यै ।। दर्शपूर्णमासादीनि सत्रान्तानि कर्माण्युक्तानि । अधुना तेष्वेव कर्मसु कर्मविनाशे प्रायश्चित्तान्यभिधीयन्ते । कर्मविनाशश्चतुःप्रकारः अकरणं न्यूनकरणंमतिरिक्तकरणमन्यथाकरणं च ।

Ends:— इति श्रीत्रिशत्क्रतुतन्महायाज्ञिकश्रीश्रीप्रजापतिसुतेन सम्राट्स्थपति-

महायाज्ञिकश्रीश्रीदेवकृतायां कात्यायनसूत्रपद्धतौ पंचविंशोऽध्यायः ।। श्रीः ग्रन्थ संख्या अनुक्रमणी समेत ३९०० समाप्त ।।

Name of 'दी० मणिराम शिवानन्द' written on the cover page.

247. Kuṇḍanirmāṇaślokavyākhya

कुण्डनिर्माणश्लोकव्याख्या

(A commentary on नवकुण्डविधिः [ms no. 246])

Author— Rāmachandrāchāryaḥ

Foll. 16 (f. 15 missing); 26×10 cms.; paper; Devanāgarī script; Sanskrit; lines per page 9; letters per line 33/34; 17th c.; waterstained; bears two seals of M. K. Ram Singh dt. 1718 V. S. (1661 A. D.); incomplete.

(on the upper margin of f.I b.)—

अग्निहोत्रं तपः सत्यं वेदानां चैव पारणम् ।
आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ।।१।।

वापीकूपतड़ागादिदेवतायतनानि च
अन्नप्रदानमारामाः पूर्तमित्यभिधीयते ।।२।।

Begins:— **श्रीगणेशाय नमः ।।**

इष्टापूर्तेष्वङ्गमाद्यं० ... ... विचार्य ।।१।। अस्यार्थः इष्टं यागादिवापीकूपतडागादि० तत्र आद्यं मुख्यं यद् अङ्गं यस्य न्यूनत्वे अधिकत्वे च बहवो दोषाः रोगादयो भवन्ति—

खातेऽधिके भवेद्रोगो हीनत्वे तु धनक्षयः ।
वक्रतुण्डे तु संतापो मरणं छिन्नमेखले ।।
मेखलारहिते शोको ह्यधिके वित्तसंक्षयः ।

भार्याविनाशनं प्रोक्तं कुण्डं योन्या विनाकृतम् ।।
अपत्यध्वंसनं प्रोक्तं कुण्डं यत्कण्ठवर्जित' मिति ।।

तत्कुण्डान् नैमिषारण्यस्थो रामो विचार्य सूक्ष्मभेदानवलोक्य साङ्गं कण्ठमेखलानाभिमण्डपादियुक्तं भूरिभेदं चतुरस्रयोन्यादिभेदयुक्तं ब्रूते वदति ।।

In the end :-
(the letters are illegible being water-stained)

संवत् १६.......ज्येष्ठमासे ... कृष्णपक्षे ६ भौमे लिखितं ।। ।।भट चिंतामणि आत्मपठनार्थं ।। श्री विश्वेश्वराय नमः ।।

341. Kuṇḍapradīpakaḥ

कुण्डप्रदीपकः

Author— Mahādevaḥ, son of Kāhnajī with ct. by the author.

Foll. 8; 32×15·5 cms.; paper; Devanāgarī script; Sānskrit; lines per page 19; letters per line 40; 1820 V. S. (1763 A.D.) ; scribe-Gulābarāya

Begins:—

श्रीगणेशाय नमः ।।

प्रणम्यैकरदं देवं शारदां गुरुमेव च ।
कुण्डप्रदीपकं कुर्वे बालाऽज्ञानतमोपहम् ।।१।।

Ends: --

अज्ञानामनवद्यपद्यरचना नाना विचिन्त्यात्मना ।
लोकानां व्यवहारदर्शनविधावङ्केन्दुवृन्दैः स्फुटम् ।।

श्रीमद्रैवतराजपूजितपदः श्रीकान्हजीवाडवः ।
सूनुस्तस्य च कुण्डदीपमकरोदेतं महादेवकः ।।२२।।

अत्राद्यमानुष्टुभं पराणि शार्दूलविक्रीडानि मण्डपच्छादनस्नपनकृते स्रग्धराख्ये ।

इति कुण्डप्रदीपः सटीकः ।। संवत् १८२० आषाढ़ वदि १ रवौ श्रीकाश्यां लिखितमिदं पुस्तकं कुण्डप्रदीपाख्यं व्याख्यासहितं सुखेन ।। (in a different hand) गुलाबरायेण

342. Kuṇḍapradīpakaḥ (with ct.)

कुण्डप्रदीपकः (सटीकः)

Author— as in 341 above.

Foll. 11 ; 27×11 cms. ; paper ; Devanāgarī script;

Sanskrit; lines per page 12; letters per line 44-46; 1805 V. S. (1748 A. D.); an earlier copy of the work composed in 1696 V. S. (1639 A.D.)

Ends :—इति श्री राजगुरुमहादेवविरचितः कुण्डप्रदीपकः समाप्तः ।। संवत् १६९६ शाके १५६१ ग्रन्थजन्म ।। संवत् १८०५ वर्षे कार्तिककृष्णे चतुर्दश्यां लिपिकृतं गुरौ मुलताने ।।

248. Kuṇḍamaṇḍapavidhiḥ (with ct.)
कुण्डमण्डपविधिः (सटीकः)

Author— Viṭṭhala Dīkṣitaḥ
Foll. 25; tripāṭha; 27.5×11.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page- text 2/3, ct. 6/8; letters per line- text 38; ct. 42/44.

Begins;— (text)

गाढं ध्वान्तमनेकभानुजठरे राजत्कलाधारिणि
प्रोदञ्चच्छफरीयुगं दरदलत्पद्मेऽणुहीरावलीः ।

स्वर्णोत्तुङ्गगिरिद्वयाधरचरी दीना कलिन्दात्मजा
पश्याश्चर्यमिदं शिवामिति वदन् स्मेरः शिवः पातु वः ।।१।।

कृष्णात्रिगोत्रे नितरां पवित्रे पवित्रकर्माऽजनि बूबशर्मा ।
तत्सूनुना विट्ठलदीक्षितेन विलिख्यते मण्डपकुण्डसिद्धिः ।।२।।

Begins– (ct.) ।। **श्रीगणेशाय नमः** ।।

मत्तमतङ्गजवदनं सादितविघ्नावलीसदनं
गौरीहरयोःस्तोकं पालितलोकहृदालम्बे ।।१।।

कल्याणि वाणि निजपाणिसरोजयुग्मं
संयोज्य देवि करवाणि तव प्रणामम् ।
मत्तुण्डमण्डललसद्रसनाङ्गणं ते
नृत्याय नित्यमिदमस्तु रसानुसिक्तम् ।।२।।

'सन्तानकल्पतरुमण्डपमण्डितायां कुण्डोल्लसज्ज्वलनकाञ्चनवेदिकायां' सीतारघूद्वहे कराकलितैः कथारम्भैः स्वेष्टदेवतानमस्कारादिरूपं मङ्गलमाचरन्ति तस्मान्माध्यंदिनीयो विट्ठलशर्मा कुण्डसिद्धिं चिकीर्षुः स्वाभीष्टदेवतास्मरणमाशीरूपं मङ्गलमाचरति शार्दूलविक्रीडितेन ।

Ends (text) :—

कुण्डाकारो नाभिरम्भोजसाम्यो वाब्जे येनेनांशहानिर्दलाग्रे ।
शेषे क्षेत्रे वह्निवृत्तैः समेते स्युर्वै कर्णिकेसरापत्रकाणि ॥५२॥

(ct.) अथेयं मत्कृतिरुमेशतोषायेति वसन्तमालिकयाह 'इतीति'
इति मण्डपकुण्डसिद्धिमेनां रुचिरां विट्ठल दीक्षितो व्यधत्त ।
इमामधिकाशिनगर्यामैशतुष्ट्यै विबुधः शोधयतामिमां विचार्य ॥१॥

इति एवं प्रकारेण विट्ठलदीक्षितो रुचिरां मनोहरां मण्डपकुण्डसि-
द्धिनाम [म्नीं]ग्रन्थरचनां काशीनगरे उमेशयोस्तुष्ट्यै कृतबान् इमां विबुधो
विचार्य शोधयतु ॥१॥

कृतिदिवसमाह शशियुगतिथिरिति—

शशियुगतिथिगण्ये याऽति शाके वरेण्ये
विभवशरदि रम्ये मासि शस्ये तपस्ये ।

शशधरभृति दक्षे मुंथपक्षेऽवलक्षे
कमलनयनतिथ्यां भानुगद्वारवत्याम् ॥२॥

ग्रन्थे परोक्ते मम द्वेषिणोक्त्या किं वा गुणोक्त्या विदुषां विचार्य ।
ग्रन्थे मदुक्ते सदसद्विशोध्य सर्वस्तु सर्वं नहि वेद कश्चित् ॥३॥

अङ्गीकार्या मत्कृतिर्निर्मलेयं कस्मादेवं पण्डितान्प्रार्थयेऽहम् ।
क्षीरं पेयं नीरमेतद्विहाय को वा विज्ञहंसमज्ञोऽर्थयेत ॥४॥

इति संगमेरस्थ (संगमनेरस्थ) विट्ठलदीक्षितबिरचितकुण्डसिद्धिः
व्यधत्तेति पूर्वश्लोकेनान्वयः । अन्यत् सर्वं सुगमं ॥
इति विट्ठलदीक्षितविरचिता स्वकृतकुण्डसिद्धिव्याख्या समाप्ता
॥ शुभं भवतु ॥

183. Kṛchchhrapratyāmnāyāḥ

कृच्छ्रप्रत्याम्नायाः

Foll. 8; 24·5×11; cms.; paper; Devanāgarī script; Sanskrit; lines per page 9; letters per line 32/33; 19th c.

Ends:—मासव्रते व्रतोपनियमाद्यनेकानि कर्त्तव्यव्रतोद्यापनमासव्रते बु क्लेशाधिक्योपेत-
चान्द्रायणव्रत इवाष्टौ गावः कल्पा इति मासोपवासप्रत्याम्नायाः ॥श्रीः॥

241. Koṭihomavidhlḥ

कोटिहोमविधिः

Foll. 12 ; 22×10 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10; letters per line 28; 18th c.; incomplete.

240. Kṣatriyāṇām Nārāśaṁsabhakṣyavidhiḥ

क्षत्रियाणां नाराशंसभक्ष्यविधिः

Hymns prescribed to be recited by a Kṣatirya while taking food during the sacrifice.

Foll. 2; 21·5×10·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10; letters per line 28; 18th c.

Begins :—स यदह् वीक्ष्यमाणो भवति तदहः पूर्वाह्णः एवोद्यन्तमादित्यमुपतिष्ठेत ।

Ends:—नाराशंसपीतस्य देव सोम ते मतिविदः काव्यैः पितृभिर्भक्षितस्य भक्षयामि ।
इति क्षत्रियस्य नाराशंसभक्ष्यविधिः ॥

643. Gaṇapatipūjāvidhiḥ

गणपतिपूजाविधिः

Foll. 4; 19×12·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8/9; letters per line 26; 19th c.

702. Garbhasrāvaharavidhānam

गर्भस्रावहरविधानम्

A compilatlon of mantras and prescriptions for easy delivery.

Foll. 44; 20·5×16·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 14; letters per line 16/20; 20th c.

225. Gṛhyasūtram

गृह्यसूत्रम्

Author— Āśvalāyanaḥ
Foll. 31; 28×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 34; 1731 V.S. (1676 A, D.); scribe-Rāmakṛṣṇa.

Begins :— ।। श्रीगणेशाय नमः ।।

उक्तानि वैतानिकानि गृह्याणि वक्ष्यामस्त्रयः पाकयज्ञा हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुता अथाऽपि ऋच उदाहरन्ति यः समिधाय आहुती यो वेदेनेति समिधमेवापि श्रद्धदान अदधन्मन्येत यज इदनिति नमस्तस्मै य आहुत्या वेदेनेति विद्ययैवाप्यस्ति प्रीतिस्तदेतत्पश्यन्नृषिरुवाच ।।

Ends: —इत्याश्वलायनगृह्यसूत्रे चतुर्थोऽध्यायः ।।श्रीः।।
चन्द्राग्निमुनिभू (१७३१) वर्षे भाद्रे मासि वलक्षके
अलेखि रामकृष्णेन चतुर्दश्यां गुरोर्दिने ।। ।। श्रीरामकृष्णौ जयतः ।।श्रीः।।

220. Gṛhyasūtram (with ct.)
गृह्यसूत्रम् (सव्याख्यम्)

Author— Pāraskaraḥ; commentator - Hariharaḥ
Foll. 113; 20×10 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10; letters per line 32; 19th c.

Begins:— श्रीगणेशाय नमः ।।

इष्टापूर्तक्रियासिद्धिहेतुं यज्ञभुजां मुखम् ।
अग्निं त्रयीवचःसारं वन्दे वागधिदैवतम् ।।१।।
पारस्करकृते गृह्यसूत्रे व्याख्यानपूर्विकाम् ।
प्रयोगपद्धतिं [वक्ष्ये] वासुदेवादिसम्मतम् ।।२।।

367. Gṛhyasūtram (with ct.) III
गृह्यसूत्रम् (सव्याख्यम्) तृतीयकाण्डः

Author— Pāraskaraḥ; commentator - Hariharaḥ
Foll. 133; 25×12 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10; letters per line 34; old; 16th c.; in the old register the date of script is given 1635 V. S. (1578 A D.)

Ends:—इत्यग्निहोत्रिहरिहरविरचितं पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ तृतीयः काण्डः समाप्तः ।।श्रीः।।

655. Gṛhyasūtram (with ct.)
गृह्यसूत्रम् (सव्याख्यम्)

(Text & commentary as above.)

Foll. 130; 35·5×16 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10/12; letters per line 35/38; 19th c.; brittle paper.

221. Gṛhyasūtram (with ct.)

गृह्यसूत्रम् (सव्याख्यम्)

Author— Pāraskaraḥ; ct. by Gadādhara, son of Vāmana.
Foll. 134; 22×9·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8/11; letters per line 29/30; scribe-Vreśvara Śukla; 1750 V. S. [1693 A. D.]

Begins:— ।। श्रीगणेशाय नमः ।।

आविर्बभूवश्चतुर्धा यः कपिभिः परिवारितः ।
हतवान् राक्षसानीकं राम दाशरथिं भजे ।।१।।

स्वाभिप्रायेण हि मया न किंचिदिह लिख्यते ।
किन्तु वाचनिकं सर्वमतो ग्राह्यं च निर्भयैः ।।२।।

अथातोऽधिकार इत्यादिना श्रौतानि कर्माण्युक्तानि । तदनन्तरं स्मार्तादि विधीयन्ते ।। तत्रै तत्प्रथमं सूत्रं ।। अथातो गृह्यस्थालीपाकानां कर्म ।।

Ends:—

इति सम्राड्वामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डं समाप्तमिति । संवत् १७५० वर्षे चैत्रमासे शुक्लपक्षे पञ्चमी ५ भृगौ लिखितं शुक्ल नारायण तत्पुत्र शुक्ल देवजी तत्पुत्र शुक्ल माधव तत्पुत्र शुक्ल सोमजी तत्पुत्र शुक्ल श्यामजी तत्पुत्र शुक्ल अम्बिकेश्वर कनि [ष्ठ] भ्रातृवीरेश्वरेण लिखितमिदं पुस्तकम् ।।

224. Gṛhyasūtram (with ct.)

गृह्यसूत्रम् (सभाष्यम्)

Author— Pāraskaraḥ; ct. by Karkāchārya.
Foll. 62; 22·5×10·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 9, letters per line 34; 1749 V. S.(1692 A. D.); scribe-Vīreśvara.

Begins: — ।। श्रीगणेशाय नमः ।। श्रौताधानादीन्युक्तानि कर्माण्युक्त्वा तदनन्तरं स्मार्तानुविधीयन्ते ।…………

Ends: —इति कर्कोपाध्यायकृतं गृह्यभाष्यम् ।। तृतीयं काण्डं समाप्तम् ।। संवत् १७४९ वर्षे कार्तिकमासे कृष्णपक्षे ५ गुरुवासरे लिखितं शुक्ल श्यामजी सुत अम्बिकेश्वर तद्भ्रातृवीरेश्वरेण लिखितं ।। शुभम् ।।

222. Gṛhyasūtram (with ct.)

गृह्यसूत्रम् (सव्याख्यम्)

Author--Pāraskaraḥ ; ct. by Gadādhara.
Foll.68; 23·5×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 9; letters per line 30/31; 18th c.; incomplete

Begins:—…………………त्यर्थसारे चैवं ।। आश्वलायनकारिकायां तु प्रायश्चित्तं कृतेऽतीत कर्म कृताकृतमित्युक्तम् ।।

Ends: —इति श्रीत्रिरग्निचित्सम्राट्स्थपतिश्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते सीतायज्ञे पदार्थक्रमः ।। इति गदाधरकृतं द्वितीयसूत्रभाष्यं ।

704. Godānapaddhatiḥ

गोदानपद्धतिः

Foll. 1; 13·5×10·5 cms.; paper; Devanāgarī script; Sanskrit; lines 36 in all; 18th c.; a stray leaf no. 5 only.

262. Godānapaddhatiḥ

गोदानपद्धतिः

(From Nārdīyapurāṇa)
Foll. 5; 27.5×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 12; letters per line 34/35; 1804 V. S. (1747 A. D.)

Ends:—इति नारदीयपुराणे गोदानविधानं समाप्तम् ।। संवत् १८०४ अश्विन सुदि १४ लिखितं मुच्चन तुलसीरामवाचनार्थं ।।

255. (Nava)Grahaśāntipaddhatiḥ

(नव)ग्रहशान्तिपद्धतिः

Foll. 14: 22·5×9·5; cms.; paper; Devanāgarī script; Sanskrit; lines per page 7; letters per line 28; 1694 V.S. (1637 A.D.); bears two seals of M. K. Ram Singh dt. 1718 V. S.

Begins:-— ।। श्रीगणेशाय नमः ।। अथ नवग्रहशान्तिपद्धतिर्लिख्यते ।।

नवग्रहलेखनं पट्टे पीठे वस्त्रे च पट्टके । (यत्रावल्यामिति)
पद्ममध्ये रविं रक्तं वर्तुलं प्राङ्मुखं सदा ।।

अग्निकोणे सितं चन्द्रं चन्द्रार्धसदृशं लिखेत् ।
दक्षिणे लोहितं विद्यात् त्रिकोणं मङ्गलं तथा ।।

ईशाने धनुषाकारं पीतवर्णं तु सोमजम् ।
उत्तरे पीतवर्णं च पद्माकारं बृहस्पतिम् ।।
चतुरस्रं तथा प्राच्यां शुक्लवर्णं तु भार्गवम् ।
पश्चिमे कृष्णवर्णं तु दण्डाकारं शनैश्चरम् ।।

256. Grahaśāntiḥ

ग्रहशान्तिः

Foll. 173; 26×12 cms.; paper; Devanāgari script: Sanskrit; lines per page 11; letters per line 35/36; incomplete; 18th c.; ff. 23, 24, 25, 49 to 55 and 141 to 144/14 missing.

B gins:— ।।ॐ।। अथ नवग्रहयज्ञशान्तिः ।। तत्र याज्ञवल्क्यः ।।
श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।............

अत्र समाससंहितावचनं तद्वचनं यथा ।। क्रूरग्रहर्क्षलक्षणातिथिकरणप्रभञ्जनैर्दीप्तादीप्ताण्डजमृगविरुतैर्निर्घातक्षितिविमर्दैश्चेति ।। इत्युल्का तत्फलनिरूपणम् ।। श्रीः ।।

श्रीरस्तु लेखकपाठकयोः ।। श्रीरस्तात् ।।श्रीः।।

329. Ghaṭotpattividhiḥ

घटोत्पत्तिविधिः

Foll. 15; 30×12.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 32/33; 18th c.

Begins:-—अथ घटोत्पत्तिविधिः ।। पितामहः—
छित्त्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्या मनीषिभिः ।।

Ends :--कर्कटस्तुलान्तयो = शिक्यधारणार्थं वक्रं शलाकाद्वयं शिक्यं शिका इति प्रसिद्धं सादः पदाधारस्तम्भयोः अक्षस्तम्भयोरुपरि पट्टः ततो गुरुपुरोहित-होतृन् दक्षिणाभिस्तोषयेत् ।

189. Chaturaṅgakrīḍanam

चतुरङ्गक्रीड़नम्

(from Jayakaumudī in Tithi-tattva of Raghunandana.)
—on playing with dice.
Foll. 4; 24×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 31/32; 19th c.

Begins:— ॥ **श्रीगणेशाय नमः** ॥ जयकौमुद्यां ॥

नारिकेलोदकं पीत्वा अक्षैर्जागरणं निशि ।
तस्मै वित्तं प्रयच्छामि कोजागर्ति महीतले ॥

अक्षक्रीडायां व्यासयुष्ठिरसंवादः प्रचरति यथा युधिष्ठिर उवाच—

अष्टकोष्ठ्यां च या क्रीड़ा तां मे ब्रूहि तपोधन ।
प्रकर्षणेनैव मे नाथ चतूराजी यतो भवेत् ॥

व्यास उवाच—

अष्टौ कोष्ठान् समालिख्य प्रदक्षिणाक्रमेण तु ।
अरुणं पूर्णतः कृत्वा दक्षिणे हरितं बलम् ॥

Ends:--

न कुर्यादेकदा राजन् गजस्याभिमुखं गजम् ।
यदि कुर्वीत धर्मज्ञ पापग्रस्तो भविष्यति ॥

स्थानाभावो यदा पार्थ हस्तिनः हस्तिसम्मुखम् ।
करिष्यति तदा राजन् इति गौतमभाषितम् ॥

प्राप्ते गजद्वये राजन् हन्तव्यो वामतो गजः ॥
इति चतुरङ्गक्रीडनम् ॥

190. Chaturaṅgakrīḍanam

चतुरङ्गक्रीड़नम्

(as above)

Foll. 4; 27.5×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 38; 18th c.; bears two seals of M. K. Ram Singh.

Ends:— इति चतुरङ्ग- क्रीडनम् ।। तिथितत्त्वग्रन्थात् ।।
वस्विन्दुमुनिभूवर्षे फाल्गुने धवलेतरे । (१७१८)
अलेखि रामकृष्णेन त्रयोदश्यां बृहस्पतौ ।।१।।

302. Chūḍākaraṇavidhiḥ

चूडाकरणविधि:

Foll. 5; 21.5×10 cms.; paper; Devanāgarī script; Sanskrit; lines per page 9; letters per line 30/31; 18th c.; incomplete

Begins: — ।। श्रीगणेशाय नमः ।।

सांवत्सरिकस्य चूडाकरणं तृतीये वा प्रतिहते षोडशवर्षस्य केशान्तो यथा मङ्गलं वा सर्वेषां ब्राह्मणानां.........

Ends:—शान्तिरिति शान्ति करोति शान्तिभाजनं गुरवे दद्यादेवमेवावगुण्ठनीम् च गोदानं........ ... .

334. Janmadivasakṛtyam

जन्मदिवसकृत्यम्

Foll. 4; 20·5x11 cms.; paper; Devanāgarī script; Sanskirt; lines per page 7; letters per line 25/26; 18th c.

396. Janmadivasakṛtyam

जन्मदिवसकृत्यम्

Foll. 6; 20·5x13 cms.; paper; Devanāgarī script; Sanskrit, lines per page 6; letters per line 19/20; 1940 V. S. (1883 A. D.)

308. As above.

Foll. 4; 26×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 6/7; letters per line 34; 1741 V. S. (1684 A. D.); written at Jamrud.

292. Janmāṣṭamīvratavidhiḥ

जन्माष्टमीव्रतविधिः

(from Bhaviṣyottarapurāṇa)

Foll. 6; 28x11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 7; letters per line 34; 1741 V.S. (1684 A. D.); written at Jamrud.

Ends: —जन्माष्टमी जनमनोनयनाभिराम—
पापापहा झटिति नन्दितनन्दगोपा ।

यो देवकीं सुतयुतां यजतीह तस्यां
पुत्रानवाप्य समुपैति पदं स विष्णोः ॥

इति श्रीजन्माष्टमीव्रतं समाप्तं ॥ संवत् १७४१, भा०ब०५, मु० जमरोद ।

123. Jātivivekaḥ

जातिविवेकः

(from Viśvambharavāstuśāstra of Gopīnātha Kavi s/o Śārṅgadhara).

Foll. 21; 26×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8/9; letters per line 37/38; 19th c.; mixed folia.

695. Jātivivekaḥ

जातिविवेकः

(from Viśvambharavāstuśāstra of Gopinātha Kavi s/o Śārṅgadhara).

Foll. 68+9; 19×15 cms.; paper; Devanāgarī script; Sanskrit; lines per page 14; letters per line 16; 1957 V. S (1900 A. D.).; bound; contents given in 9 ff. in the beginning; scribe-Nārāyaṇa:

481. Tarpaṇaprayogaḥ (Kātīyaḥ)

तर्पणप्रयोगः (कातीयः)

Author—Kātyāyanaḥ

Foll. 13; 20·5×14 cms.; paper; Devanāgarī script; Sanskrit; lines per page 6; letters per line 14; 1936 V. S. (1879 A. D.)

584. Same as above.

Foll. 6; 22×10 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 20/21; 19th c.

282.(a & b) Tarpaṇavidhiḥ

तर्पणविधिः

Foll. 4 (a); 4 (b); 22×10 cms. (a); 24×9.5 (b); paper; Devanāgarī script; Sanskrit; lines per page 7(a); 6 (b); letters per line 32 (a); 26 (b); 18th c.

Ends :—भीष्मः शान्तनरो वीरः सत्यवादी दृढव्रतः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥

283. As above

Foll. 7; 28×12 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10; letters per line 28; 18th c.

490. As above.

Foll. 3; 21×10 cms.; paper; Devanāgarī script; Sanskrit; lines per page 7; letters per line 26; 1924 V. S. (1867 A. D.)

680. Tithyarkaḥ

तिथ्यर्कः

(based on Bhagavantabhāskara of Nīlakaṇṭha).

Author— Divākaraḥ s/o Mahādeva.

Foll. 74; 27X10·5cms.: paper Devanāgari script; Sanskrit; lines per page 9/12; letters per line 29/36; 1823 V. S. (1766 A. D.); mixed folia in different handwritings; the last writer is Tejabhāna.

Begins :— ॥ श्रीकृष्णाय नमः ॥

ॐ उत्पत्यादिप्रकर्तारं हर्तारं तमसः परम् ।
दातारं सर्वकामानां तं भजेऽहं विकर्तनम् ॥१॥

मयूखं सागरं मत्वा प्रार्थितोऽयं जनो जनैः ।
सम्यङ् निर्माति तिथ्यर्कं दृष्ट्वा स्मृत्त्वा च भास्करम् ॥२॥

गुरुं नीलकण्ठं प्रणम्य प्रकृष्टं
ततस्तत्कृतं ग्रन्थमालोक्य सम्यक् ।

तिथीनामयं ह्यर्कनामा निबन्धो
मया रच्यते तं हृदि स्थापयित्वा ॥३॥

महादेवतनूजेन भारद्वाजेन धीमता ।
दिवाकरेण क्रियते तिथ्यर्कः कालवित्तये ॥४॥

Ends :— इति श्रीमद्भारद्वाजमहादेवसूनुश्रीमद्बालकृष्णसुतश्रीमहादेवात्मजकृतिस्तिथ्यर्कः ॥ संवत् १८२३ मृगशिरसुदि १२ शनौ लिखितं पुस्तकमिदं शेषतेजभानेन ॥

229. Trikaṇḍikāsūtram

त्रिकण्डिकासूत्रम्

Author:-- Kātyāyanaḥ

Foll. 2; 28×10 cms.; paper; Devanāgarī script; Sanskrit; lines per page 5/8; letters per line 32/33; 18th c.; incomplete; f. 1 missing.

230. Same as above.

Foll. 12; 28X11·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 6; letters per line 28; 1741 V. S. (1684 A. D.)

Ends:— इति कात्यायनमुनिप्रणीतं सूत्रसमेतं समाप्तम् ॥ संवत् १७४१ का० वदि ५.

231. Trikaṇḍikāsūtram (with ct.)

त्रिकण्डिकासूत्रम् (सभाष्यं)

Author:— Kātyāyanaḥ; ct. by Harihara

Foll. 27; 28X11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 38; 18th c.; bears one seal of M. K. Ram Singh.

317. Tripiṇḍīśrāddhavidhiḥ (on last rites)

त्रिपिण्डीश्राद्धविधि:

Foll. 4; 21·5×12·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 12; letters per line 30: 1789 V. S. (1732 A. D.)

on the last page:-

कान्ताऽर्भकस्वजनबन्धुसुहृद्विहीनो

दारिद्य्रदैन्यगददु:खमलैरुपेत: ।

प्रोक्त: खल: सकललोकविरुद्धवृत्ति:

केमद्रुमे भवति पार्थिववंशजोऽपि ॥१॥

वीरेश्वरस्येदं पुस्तकम् ॥

145. Triṁśachchhlokī (with ct.)

त्रिंशच्छ्लोकी (सटीका)

ct. by Bhaṭṭāchārya

Foll 11; 35·5x16·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 18; letters per line 46/48; bears 4 seals of M. K. Ram Singn dt. 1718 V. S. (1661A. D.); an earlier copy.

147. Triṁśachchhlokibhāṣyam

त्रिंशच्छ्लोकिभाष्यम्

Author:— Vijñāneśvaraḥ

Foll. 19; 24·5×10·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 11; letters per line 38/39; 18th c.

A fair copy; it is corrected by a paṇḍita known as Pola in 1803 V. S. (1746 A. D.)

रामव्योमाष्टभूम्यब्दे भाद्रकृष्णतिथौ हरेः ।
इदं पुस्तं पोलनाम्ना शोधितं तु यथामति ।।

184. Traivarṇika-pārivrājyavichāraḥ

त्रैवर्णिकपारिव्राज्यविचारः

Foll. 43; 33·5X15·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 12; letters per line 50; 19th c.; incomplete.

Begins :—

(on the margin)
श्रीमत्सीतारमण श्रितजनविश्रान्तिपारिजातमहम् ।
श्रुतिशिखरवृन्दवन्दितपदारविन्दं श्रये सततम् ।।

श्रीमद्भिः सम्राड्भिःसवायिजयसिंहनृपकुलोत्तंसैः ।
त्रैवर्णस्याधिकृतिः पारिव्राज्ये परिक्रियते ।।

the text:— ।। **श्रीगणेशाय नमः** ।। श्रीगणाधिपतये नमः ।।

ॐ नमो भगवते वासुदेवाय ।। ॐ नमो विघ्नहर्त्रे ।।

ॐ कृच्छ्रांस्तु चतुरः कृत्वा पावनार्थमनाश्रमी ।
आश्रमी चेत्तप्तकृच्छ्रं तेनासौ योग्यतां व्रजेत् ।।

एवं सन्यासात्पूर्वं सन्यासाधिकारसंपत्तये मुख्यरीत्या प्रतिनिधिरीत्यावा कृच्छ्रमुक्तसंख्यं कुर्यात् ।।

Ends on f. 43 (a)................

इति निरुक्तार्थानुसन्धानं कुर्वतः प्रणवार्थानुसंधानपरस्य मध्यविधित्याग एव विवक्षितः । अत एव एवं विद्वान् नित्यादिना क्षुद्रमेव श्रूयमाणं फलं संगतं भवति......................... (incomplete).

151. Daśakarma-nirṇayaḥ

दशकर्मनिर्णयः

Foll. 80; 25·5×16 cms.; paper; Devanāgarī script; Sanskrit; lines per page 12; letters per line 48; 19th c.

Begins:— ।। **श्रीमते रामानुजाय नमः** ।।

एता वाजयन्ती निर्णीयते ।। सर्वत्र निर्णये शास्त्रमेव हि प्रमाणं,न युक्तयः ।।
यदगादि "तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यस्थितौ ।"

Ends: — दशम्येकादशी यत्र नवमीमिश्रिता यदि ।
उपोष्या द्वादशी तत्र यदीच्छेत् परमां गतिम् ।।
तिथित्रयसमायुक्तां दशमीवेधवर्जिताम् ।
एकादशीं समां त्यक्त्वा द्वादशीं समुपोषयेत् ।।

The Karmas are :-

जयन्तिजन्माष्टमी, कृत्तिका दीपमालिका, उपाकर्मनिर्णयः, गोत्रप्रवरनिर्णयः विवाहनिर्णयः, अगत्या पेयमानप्रायश्चित्तनिर्णयः, अभक्ष्यभक्षणनिर्णयः, चलोपनयनादिनिर्णयः, एकादशीनिर्णयः ।।

245. Daśakarmapaddhatiḥ

दशकर्मपद्धतिः

Author:— Gaṇapatiḥ, s/o Hariśaṅkara Rāvala
Foll. 27; 23x11 cms.; paper; Devanāgarī script; Sans krit; lines per page 11; letters per line 28; 1761 V.S. (1704 A. D.); scribe-Harirāma Jāni.

Begins:— ।। **श्रीगणेशाय नमः** ।।

गणेशं गिरिजां नत्वा गुरुं हरिहरौ तथा ।
करोमि बालबोधार्थं पद्धतिं दशकर्मणाम् ।।
तत्र प्रथमं सकलकर्मोपयोगिनी कुशकण्डिका प्रोच्यते ।

Ends: — रसाब्धिसप्तभूमितेऽब्दके तु मार्गशीर्षके ।
शनौ द्वितीयकातिथौ समाप्तिमाप पद्धतिः ।।

इति श्रीमदनवद्यविद्यासमासादितसकलपुरुषार्थरावलहरिशङ्करतनुजेन गणपति संज्ञेन कृता प्रयोगरूपा दशकर्मपद्धतिः समाप्ता । श्रीभवानीशङ्करार्पणमस्तु ।। जानी हरिरामेण त्रुटिकपत्र लिखितं ।। शुभं भवतु ।। संवत् १७६१ वर्षे फाल्गुन सुदि ११ शुक्रे लिखितम् ।

656. Daśakarmapaddhatiḥ

दशकर्मपद्धतिः

(compiled : from Garbhādhāna to Chaturthī-karma)
Foll. 36; 35·5x17 cms.; paper; Devanāgarī script; Sanskrit; lines per page 12; letters per line 42 ;1927 V. S. (1870 A. D,)

Ends:— इतिचतुर्थीकर्मं समाप्तं ।। शुभं भूयात् ।।

लेखक घासीराम । सं. १९२७ का मीती ज्येष्ठ बुदी १४ दीतवार लीखी मोजमिन्दर मध्ये पुस्तक दशकर्म की पत्र ३६ श्री शिवायनमः ।

146. Das'akarmapaddhatiḥ or Das'as'lokī (with ct.)
दशकर्मपद्धतिः वा दशश्लोकी (सव्यख्या)

(from Vijñānes'vara's Mitākṣarā)
ct. by Harihara.
Foll. 14; 24X10·5 cms.; paper; Devanāgarī script; Sanskrit: lines per page 9; letters per line 36; 18th c.

Beginst:— **।। श्रीगणेशाय नमः ।।**

विज्ञानेश्वरविरचितमुनिजनवाक्यैर्मिताक्षरामध्यात् ।
आशौचदशदशाङ्कं वृत्तिं वदति हरिरुरौ नत्वा ।।१।।

विज्ञानेश्वरयोगीन्द्रश्चतुर्वर्णलोकस्य जन्मनिस्यूतिभवं सूतकं मरणे शवमवं-शावं सूतकं शावशुद्धयर्थं वृत्तदशांङ्कं शार्दूलविक्रीतेन विरचितम् ।।

Ends:—शूद्रधर्मः संकरिणामाहृतः धन्यशब्दो मङ्गलवाचक इति ।।
इति विज्ञानेश्वरविरचिता दशश्लोकी सभाष्या सम्पूर्णा ।। शुभमस्तु ।।

171. Dars'as'rāddhaprayogaḥ
दर्शश्राद्धप्रयोगः

Author:— Nṛsiṁhaḥ

Foll. 23; 26X10·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10; letters per line 40-41; 17th; c.;

Begins:— **स्वस्ति श्रीगणेशाय नमः ।।**

नत्वा नृसिंहः पितृयज्ञश्राद्धद्वयस्य व्यतिषङ्गिणोऽथ ।
अनाहिताग्नेः स्मृतियुक्प्रयोगो बुभुत्सुबोधाय विधित्स्यतेऽसौ ।

Ends:—शुक्लपक्षस्मरणे पौर्णमासः । स सर्वात्मना मृताहाज्ञाने माघमासस्य दर्शो ग्राह्यः । प्रपोषितस्यापि सर्वात्मना मरणदिनस्याज्ञाने एवमेव ग्राह्यः ।।

263. Dānavākyāvalī

दानवाक्यावली

Foll. 9; 27·5X11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 12; letters per line 48; 18th c.

Begins: — **श्रीगणेशाय नमः** ।। अथ दानकालाः ।

कार्तिकी विवपुद्रविग्रहणयुगादिमन्वन्तरादि व्यतीपातगजच्छायाद्वादशी वैशाखी माघी आषाढी दिनक्षयवैधृतिचतुर्दशीअष्टकायज्ञोत्सवविवाह समरविजय दुःस्वप्नदर्शन द्रव्यब्राह्मणसम्पत्ति............

Ends: —इति दानवाक्यावली सम्पूर्ण ।।श्रीः।। शुभमस्तु ।।

692. Dāybhāgaḥ

दायभागः

(compiled in the Pothīkānā during the time of Sawai Madho Singh II under his orders.)

Foll. 13; 33X20·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 29; letters per line 26; 20th c.; bears two seals of the Pothikhana Dept. which was used during S. Madho Singh II's time.

Begins:—दायक०त्रि० दा दाने ण्वुल् । १ दातरि तावतां गोसहस्राणां फलं प्राप्नोति दायकः भा. व. १६३ अ० चौराणां भयदायकाः मनुः । दो खण्डने खुल् । २ खण्डके च । दायेन धनेन कायति कै क । ३ दायादे गृह्या इति समाख्याता यजमानस्य दायकाः गृह्यम् दायका दायादा इत्यर्थः ।

Ends: — अनयोश्च मतयोर्युक्तायुक्तत्वं सुधीभिर्भाव्यम्

देशानां जातिसंघस्य धर्मो ग्रामस्य यो भृगुः ।

उदितः स्यात् स तेनैव दायभागं प्रकल्पयेत् ।

भृगुवचनंभृगुराहेति शेषः । दायस्य भागः प्रतिपाद्यतयाऽस्त्यत्र अच् । २ जीमूतवाहनादिकृते दायस्य विभागज्ञापके ग्रन्थे पु० । दायभागग्राहिक्रमश्च उत्तराधिकारिशब्दे १०९९० पृ० ।

see no. 70 also on pp. 78-79.

485. Digvijayaprayāṇavidniḥ
दिग्विजयप्रयाणविधिः

Foll. 9 (mixed); 24X14 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10/15; letters per line 26/29; 1926 V. S. (1869 A. D.); an incomplete diagram on f. 1 (b).

304. Dīpamālikāvidhānam
दीपमालिकाविधानम्

Foll. 4; 28X11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 7; letters per line 30; 18th c.

Begins :— ।। श्रीगणेशाय नमः ।। अथ कार्तिककृष्णत्रयोदश्यां स्कन्दपुराणोक्त-यमदीपदानं —

कार्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे ।
यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति ।।

Ends :— तस्यां निशायां कर्तव्यं शय्यास्थानं सुशोभनम् ।
गन्धैर्वस्त्रैस्तथा पुष्पै रत्नैर्माल्यैरलङ्कृतम् ।।
दीपमालाषरिक्षिप्तं तथा धूपेन धूपितम् ।
दयिताभिश्च सहितैर्नेया सा च भगेन्निशि ।।
नवैर्वस्त्रैश्च संपूज्य द्विज सम्बन्धिबान्धवान् ।। इति

246. Navakuṇḍavidhānam
नवकुण्डविधानम्
(on the method of preparing altars for sacrifice.)

Author—Rāmchandrāchāryaḥ

Foll. 5; 27×4 cms.; paper; Devanāgarī script; Sanskrit; lines per page 12;letters per line 35/36;damaged and water-stained; 18th c.; bears three seals of M. K. Ram Singh dt. 1718 V. S.(1661 A. D.)

Begins:— स्वस्ति श्रीगणाधिपतये नमः ।।

इष्टापूर्तेष्वङ्गमाद्यं यदाहुर्यस्योनत्वाधिक्यतो भूरि दोषाः ।
[युक्तं] साङ्गः भूरि भेदं तदत्र ब्रूते रामो नैमिषस्थो विचार्य ।।१।।

Ends:—

श्रीमद्रत्नपुराधिपेनधीमता श्रीरामचन्द्रेण यो
भारद्वाजकुलाम्बुधौ विधुरिव श्रीमज्जटामद्द्विजः ।
बन्धूनां परिपालकोऽभ्युपगतौ सोम्यालये नैमिषां
तेनर्ग्वेदविदेरितेन रचिता रामेण कुण्डाकृतिः ।।७२।।
रसगगनतिथिप्रमाणवर्षे गतवति विक्रमभूमिपस्य कालात् ।
क्रतुविधिफलदायके कृतिमखेज्ज्येयमस्तु समर्पिता सुरेशे ।।७२।।
इति श्रीरामचन्द्राचार्यविरचितनवकुण्डविधिः समाप्तः ।।

289. Navarātrapūjāvidhiḥ (from– Jayasiṁhakalpedruma of Ratnākara)

नवरात्रपूजाविधिः

Describes pūia from प्रतिपदा to सप्तमी)
Foll. 21; 29X12·5 cms.; paper; Devanāgarī script; Sanskrit
lines per page 10; letters per line 43; 18th c.

275. Nityakṛtyam (according to Vallabha Sampradaya)

नित्यकृत्यम्

Foll. 3; 18·4X10 cms.; paper; Devanāgarī script; Sanskrit;
lines per page 8/9; letters per line 22/23; 18th c.

Begins:— श्रीलक्ष्मीनृसिंहो विजयते ।। सक्षेपतो नित्यकृत्यम् ।

ब्राह्मे मुहूर्ते चोत्थाय विश्वरूपं हरिं प्रभौ (प्रभु)
चिन्तयेत् सच्चिदानन्दं गोपगोपीजनप्रियम् ।
चिन्तनमेवाह—
प्रातः स्मरामि दधिघोषबिनीतनिद्रं
निद्रावसानरमणीयमुखानुरागम् ।
उन्निद्रपद्मनयनं नवनीरदाभम्
हृद्यानवद्यलसनाञ्चितवामभागम् ।।

Ends:— अथ ध्यानम्—

इन्दीवरघनश्यामं कोटिकन्दर्पसुन्दरम्
ध्याये रम्याङ्गनायामं वृन्दारण्यपुन्दरम् ।।१।।
इति संक्षेंपतो नित्यकृत्यं समाप्तम् ।।

627.(1-5) Nityatarpaṇa-vaiśvadevabali-vidhiḥ

नित्यतर्पणवैश्वदेवबलिविधिः

Foll. 1; 64.5X15 cms.; paper; Devanāgarī script; Sanskrit; lines 108 in all; letters per line 23/24; 18th c.
Five uniform copies under the same number.

433-439 Nityatarpaṇavidhiḥ

नित्यतर्पणविधिः

Foll. as under ; paper; Devanāgarī script; Sanskrit; lines per page 6/7; letters per line 20/25; 1924 V. S. (1867 A.D.) and 1937 V. S. (1880 A. D.)

No.	Foll.	Size	Lines	Letters	Year	Remarks
433	4	20.5X10.5 cm	7	26	1924	Brittle paper
434	3	21X10 cm	7	24/26	"	"
435	3	21X10 cm	7	26/27	"	"
436	3	"	7	"	"	"
437	3	"	7	30	"	"
438	3	"	7	26	"	"
439	5	16·5X10 cm	6	17/20	1937	scb. Māṅgi Lāla

709. Nityapūiāvidhiḥ

नित्यपूजाविधिः

Foll. 28; 20X10 cms.; paper; Devanāgarī script; Sanskrit; lines per page 6; letters per line 22/23; 18th c.; written within rectangles with yellow-golden border lines; appear s to have beee written during M. Ram Singh I's time as it is written in the style of Rājopayoginīpaddhati.

387. Nityaśrāddhaprayogaḥ

नित्यश्राद्धप्रयोगः

Foll. 5; 22.5×11 cms.; paper; Devanāgari script; Sanskrit; lines per page 7; letters per line 28; 1924 V. S. (1867 A. D.)

389-390. Nityaśrāddhaprayogaḥ

नित्यश्राद्धप्रयोगः

(both the copies are similar)

Foll. 2; 21·5X10·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 7; letters per line 28; 20th c.

441. Nityaśrāddhavidhiḥ

नित्यश्राद्धविधिः

Foll. 2; 16·5X10 cms.; paper; Devanāgarī script; Sanskrit; lines per page 6; letters per line 21/22; 1934 V. S. (1867 A. D.)

314. Nīlotsargavidhiḥ

नीलोत्सर्गविधिः

(from Aurdhvadaihikapaddhati of Nārāyaṇa Bhaṭṭa)

Foll. 9; 22x10·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 12; letters per line 34/35; 1743 V. S. (1686 A. D.)

Ends:—पित्रोः श्रेयसे धर्मरूपिणं रुद्रदैवतं अहं उत्सृजामि ॥ इति नीलोत्सर्गः समाप्तः ॥

सं. १७४३ वर्षे भाद्रवा वदि ८ रविवारेन शुक्ल सोमयाजी सुत शुक्ल श्यामजी तस्यात्मज अम्बिकेश्वरेन पठाणतिर्यर्गणा (?) मध्ये सांबाग्राम तन्मध्ये लिषितं ॥ कनिष्ठभ्रातृवीरेश्वरपठनार्थम् ॥ शुभमस्तु ॥ कल्याणं भवतु ॥ श्रीरस्तु ॥ श्रीः ॥

713. Pañchāyatanapūjāvidhiḥ

पञ्चायतनपूजाविधिः

(according to Vedic system)

Foll. 26; 32X15 cms.; paper; Devanāgarī script; Sanskrit; lines per page 9; letters per line 30; 19th c.; deals with the daily worship of Viṣṇu, Śiva, Gaṇeśa, Sūrya and Devī.

645. Pāpaghaṭadānavidhiḥ

पापघटदानविधिः

Foll. 9; 16.5X9·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 6; letters per line 24/25; 19th c.

583. Pārvaṇaśrāddhavidhiḥ

पार्वणश्राद्धविधिः

Foll. 20; 20·5X10.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 6; letters per line 24; 19th c.

315. Piṇḍadānavidhiḥ

पिण्डदानविधिः

Foll. 5; 20X12 cms.; paper; Devanāgarī script; Sanskrit, Guj.; lines per page 10; letters per line 30/31; 18th c.

Begins: — ।। श्रीपरमात्मने नमः ।।

आब्रह्मस्तम्बपर्यन्तं ये चान्ये गोत्रिणस्तथा ।
तेषामुद्धरणार्थाय इद पिण्डं ददाम्यहम् ।।

Ends: — उच्छिन्नकुलवंशानां ये चान्ये वाञ्छिता मया ।
तेषामुद्धरणार्थाय इदं पिण्डं ददाम्यहम् ।।६२।।
इणे मंत्रै मोटो पिण्ड मूकवे ।।१।। शुभं भवतु ।।

316. Piṇḍadānavidhiḥ

पिण्डदानविधिः

Foll. 1; 24·5X10·5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 15; letters per line 40; 18th c.

169. Pitṛbhaktiḥ

पितृभक्तिः

(also called Nityaśrāddhaprayogaḥ)
Author's name not given.
Foll. 13; 30.5X11.5 cms.; paper; Devanāgarī script; Sans-

krit; lines per page 14; letters per line 55/56; 18th c.; bears two seals of M. K. Ram Singh.

Begins: — स्वस्ति श्रीगणेशाय नमः ॥

कातीयकल्पं सहकर्कभाष्यं भूपालगोपालमतादि दृष्ट्वा ।
सतां च वाक्यानि निशम्य सम्यग् यजुर्विदां श्राद्धविधिं विधास्ये ॥

679. Pitṛbhaktiśrāddhaprayogaḥ

पितृभक्तिश्राद्धप्रयोगः

(same as above)

Foll. 39; 28X11.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 35/36; 18th c.; water-stained and inksmeared copy.

324. Pitṛbhaktitaraṅgiṇī

पितृभक्तितरङ्गिणी

(A ct. on the above by Vāchaspati Miśra)

Foll. 46; 24X14 cms.; paper: Devanāgarī script; Sanskrit: lines per page 13; letters per line 44/45; 18th c.

Begins:— ॥ श्रीगणेशाय नमः ॥

प्रणम्य वासुदेवाय तन्यते स्वः तरङ्गिणी ॥
श्रीवाचस्पतिधीरेण पितृभक्तितरङ्गिणी ॥

वराहपुराणे: —

कण्ठस्थानगतो जीवो भीतो विश्रान्तमानसः ।
ज्ञात्वा तु विह्वलस्तत्र शीघ्रं निस्सार्यते गृहात् ॥

Ends:— श्रुतीः स्मृतीरर्थगतीश्च तासु गुरूपदेशादवधार्य सम्यक् ।
श्रीश्राद्धकल्पाख्यमिमं निबन्धम् वाचस्पतिर्विश्वजनीनमूचे ॥१॥
शास्त्रे दशस्मृतौ विंशन्निबन्धा येन यौवने
निर्मितास्तेन चरमे वपुषीदं विनिर्ममे ॥२॥

इति श्रीमहामहोपाध्यायसन्मिश्रवाचस्पतिविरचिता पितृभक्तितरङ्गिणी समाप्ता ॥ शुभमस्तु ॥ श्रेयसे ॥

386. Puṣpāñjaliḥ

पुष्पाञ्जलिः

(Known as Devi-puṣpāñjaliḥ)

Author :-Rāmakṛṣṇa Kaviḥ

Foll. 6; 21×10 cms.; paper; Devanāgarī script; Sanskrit; lines per page 7; letters per line 23/24; 1924 V. S. (1867 A. D.)

251. Pratimāpratiṣṭhāvidhiḥ

प्रतिमाप्रतिष्ठाविधिः

(Also called Sarvadeva-pratiṣṭhāvidhiḥ)

Foll. 7; 27x11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 9; letters per line 40/41; 18th c.

696. Pratiṣṭhāchandrikā

प्रतिष्ठाचन्द्रिका

Author :-Harilāla Miśraḥ

Foll. 89; 31x12.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 13; letters per line 46/47; 18th c.

On the upper margin of f. I (b.)

।। श्री गोपीजनवल्लभो जयति ।। (with red ink)

श्रीमत्सपादजयसिंहपुरे प्रतिष्ठा
प्रासादहर्म्यवनकूपविधौ विधेया ।
तेनाहमत्र रचयामि सुचन्द्रिकाख्यां
कान्तां वसन्ततिलकां हरिभक्तिवृद्धयै ।।

Begins : Text :—।। ॐ ।। श्रीगणेशाय नमः ।। श्रीसरस्वत्यै नमः ।। श्रीसूर्याय नमः ।। श्रीलक्ष्म्यै नमः ।। श्रीउमायै नमः ।। श्रीगगायै नमः ।।

।। श्रीगुरुचरणकमलेभ्यो नमः ।। श्रीबंशीधरचरणकमलाभ्यां नमः । श्रीमातृचरणाभ्यां नमः ।। (all in red ink.)

प्रणम्य हरिपादाब्जं समासव्यासवर्जिता ।
क्रियते सर्वदेवानां प्रतिष्ठाचन्द्रिका मया ।। १ ।।

प्रतिष्ठापद्धतिं वीक्ष्य ग्रन्थांश्चान्यान् विलोक्य च ।
हरिलालः प्रकुरुते प्रतिष्ठाचन्द्रिकां शुभाम् ॥ २ ॥
आग्नेयादिपुराणेभ्यो धर्मशास्त्रेभ्य एव च ।
सारं सारमिहोद्धृत्य क्रियते नातिविस्तरम् ॥ ३ ॥

Ends :—इति कुण्डलक्षणं अत्र मण्डपकुण्डरचनायां विशेषो हेमाद्रिगतदानखण्डा-लिखनीयः परिभाषा च ततो लिखनीया ॥ धर्माणवतश्च सूक्तादि लिखितं वर्तते तदत्र योजनीयं लिखितुं योग्यं च लिखनीयं ।

The author was a pupil of Pandit Jagannātha Samrāt. He has compiled this work in connection with the laying of the foundation of various palaces, harem, gardens and wells etc. in the new city founded by Sawai Jai Singh. It shows that the plan of the city was known.

The ms. is incomplete and an autograph copy of the author as its writing is similar to the two works written by him which are preserved in the K. M. collection (1) Muhūrtakalpa-druma (5502) and Muhūrtaśiromaṇi (5017 K. M.)

The date of composition should be near about 1784 V. S. (1727 A. D.)

252. Pratiṣṭhāpanam

प्रतिष्ठापनम्

Foll. 13; 26x12 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10; letters per line 32/34; 1832 V. S. (1775 A. D.); written for Bhawānīśankara; scribe's name not given.

On the upper leaf :-

श्रीमद्राजारामस्य तेजभानस्य पुत्रकः ।
तस्येदं पुस्तकं ज्ञेयं त्रयोदशमितप्रपत्रकम् ॥

182. Prājāpatyādi-pratyāmnāyāḥ

प्राजापत्यादिप्रत्याम्नायाः

Foll. 7; 25x11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 9; letters per line 34; 19th c.

Ends .—सर्वत्र कृच्छ्र संख्यया योजनसंख्या ज्ञेया इति तीर्थप्रत्याम्नायः ।।

175. Prāyaśchittanirūpaṇam

प्रायश्चित्तनिरूपणम्

Foll. 2 to 58; 34x14/13 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10; letters per line 44/45; 19th c.; incomplete. First and concluding folia are missing.

172. Pretakṛtyādivākyasaṅgrahaḥ

प्रेतकृत्यादि वाक्यसङ्ग्रहः

Author :-Gaṅgādharaḥ

Foll. 18; 26.5×11.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 13/14; letters per line 30; 1589 V.S. (1532 A. D.). An autograph copy of the author; bears two seals of M. K. Ramsingh.

Ends :— इति वाक्यसङ्ग्रह : ।।

त्रिदण्डधर्माराधनगोविन्दयतिना स्फुटम् ।
गङ्गाधरेण पाराख्ये कृतोऽयं वाक्यसङ्ग्रहः ।।

संवत् १५८९ वर्षे नभसि मासे दशम्यामुशनशो वारेणान्वितायां श्रीमद्गङ्गाधरेणेयमलेखि त्रिदण्डिनाम्ना समाप्ता ।।

425 to 432 and no. 440=9 copies of :—

Balivaiśvadevavidhiḥ

बलिवैश्वदेवविधिः

No.	Foll.	size	lines	letters	date
425 to 430	3	21.5x10.5 cms.	7	25/26	1924 V.S.
431	4	,,	6	17/18	,,
432	2	20x10 cms.	7	31/32	,,
440	9	19.5x10 cms.	6	22	,,

No. 440 contains Nityatarpaṇavidhi also.

331. Brahmāstraprayogaḥ

ब्रह्मास्त्रप्रयोगः

Foll. 2; 16x.11.2 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8/9; letters per line 22; 18th c.

Begins :— श्रीहरिः ।। प्राणानायम्य । अस्य श्रीब्रह्मास्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुः सामाथर्वाणि छन्दांसि, त्रिमूर्ति परमात्मा देवता गिं बीजं यं शक्तिः, दों कीलकं, परा इति बीजं, रज इति शक्तिः, ओमिति कीलक ब्रह्मास्त्रप्रयोगसिद्धयर्थे विनियोगः ।।

Ends :—पूर्तं ब्रह्मास्त्रं तत्परं ब्रह्मदण्डास्त्रं तत्परं ब्रह्मशिरोऽस्त्रमुक्त्वा एवमर्घ्यं सूर्याय दद्यात् । तदुत्तरं शिरोमन्त्रं पठेत् । तदुत्तरं असावादित्यो ब्रह्मेति जलप्राकारं कुर्यात् तदुत्तरं कवचं पठेत् पश्चात् ओमित्येकाक्षरं ब्रह्मेति पठेत् ।।

148. Bhakṣyābhakṣyanirṇayaḥ

भक्ष्याभक्ष्यनिर्णयः

Foll. 26; 26×10.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 9; letters per line 30; 1805 V.S. (1748 A. D.)

Begins :— ।। श्रीगणेशाय नमः ।।

अथ भोज्याभोज्यानि ।। तत्र गौतमः ।। प्रशस्तानां स्वकर्मसु विजातीनां ब्राह्मणो भुञ्जीत ।

Ends :— इति भक्ष्याभक्ष्यं समाप्तं ।। संवत् १८०५ मृगशिरमासे कृष्णपक्षे तिथौ भौमवासरे ।। श्रीगणेशाय नमः ।। श्रीरामाय नमः ।। शिव ।।

243. Bhūtaśuddhi-prāṇapratiṣṭhā-mātṛkānyāsaḥ

भूतशुद्धिप्राणप्रतिष्ठामातृकान्यासः

Foll. 4; 28x11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 32; 18th c.

269. Maṇikābandha-granthaḥ

मणिकाबन्धग्रन्थः

(It is Vivāha-prakarṇa from Dāna-bhāgavatam by Kuberānanda Varṇi)

Foll. 79; 30.5×19 cms.; paper; Devanāgarī script; Sanskrit; lines per page 11/16; letters per line 47/50; ff. 1 to 10 are in a different handwriting; 18th c.; brittle.

Begins :— ।। श्रीगणेशाय नमः ।।

अत्राभिधास्ये परमं दानं सर्वोपकारकम् ।
कन्याया ब्रह्मरुद्रेन्द्रशक्रादीनां प्रियङ्करम् ।।

तत्राह याज्ञवल्क्यः—

पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परस्परः ।।

नारद : पिता दद्यात् स्वयं कन्यां भ्राता चानुमते स्थितः ।
माता मातामहो मातुलश्च सकुल्या वा तथा ।।

पुन : माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते ।
तस्यां अप्रकृतिस्थायां दद्युः कन्याः स्वजातयः ।।

Ends :—इति वणिकुबेरानन्दकृते दानभागवते पौराणिके तृतीयपरिच्छेदे विवाहमण्डनं नाम प्रकरणं समाप्तम् ।। समाप्तोऽयं चतुर्थोऽपदेशः ।। श्रीकामेश्वर्यै नमः ।। श्री रामाय नमः ।। श्रीः ।।

628. Mahālayaśrāddhaḥ

महालयश्राद्धः

(Compiled by the pandits of Maujamandir, Jaipur.)

Foll, 1; 86×21 cms.; paper; Devanāgarī script; Sanskrit; lines 78 in all; letters per line 30; 18th c.; three copies on the same serial number.

327. Mahāsaṅkalpaḥ

महासङ्कल्पः

Foll. 6; 28×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 13/14; letters per line 56/57; 18th c.; moth-eaten and damaged.

Begins :-- ॐ अथ सन्ध्यात्रयं ।।

ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने ।
तिष्ठ देवि शिखाबद्धे चामुण्डे ह्यपराजिते ।।१।।

Ends :— इति महासङ्कल्पः ।। ❀ ।।ॐ

लिखितं रघुनाथदासेन स्वपठनाय ।। ॐ नमो भगवते वासुदेवाय ।।

582. Mātṛkāśrāddhavidhiḥ

मातृकाश्राद्धविधिः

Foll. 7; 21.5×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 30; 19th c.

119. Mṛtavatsakarmaprakāśaḥ

मृतवत्सकर्मप्रकाशः

(From Jñānabhāskara in the form of a dialogue between Sūrya and Aruṇa.)

Foll. 40; 25×12 cms.; paper; Devanāgarī script: Sanskrit; lines per page 12; letters per line 38; 18th c.; bears two seals of M. K. Ramsingh.

234. Yajurvedinām kuśakaṇḍikā

यजुर्वेदिनां कुशकण्डिका

Foll. 4; 27x11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 36/37; 18th c.

Use of the sacred grass (kuśa) for the purification of the altar is explained. Homavidhi is also given at the end; bears two seals of M. K. Ram Singh.

194. Rājāhnikakṛtyāvalī

राजाह्निककृत्यावली

Author :— Lakṣamaṇa Pāṇḍe, a resident of Kūrmāchala.

Foll. 36; 30.5×10.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 7/8; letters per line 40; 20th c.

Begins :— ।। श्रीगणेशाय नमः ।।

जगत्यां विश्वनमितो जगद्रक्षणदक्षिणः

जयत्येको महाबुद्धिर्जन्मिनां हृदयस्थितः ।।१।।

श्रीज्ञानचन्द्रभूमीन्द्रतनयस्य तु नन्दनः ।

श्रीदेवीचन्द्रनृपतिश्चिरं जीवतु भूतसे ।।२।।

Ends :— श्री देवीचन्द्रभूमीन्द्रकृपादृष्टयवलोकनात् ।
मत्कृतौ चास्ति विद्वेषो येषां पण्डितमानिनाम् ।।
ईदृशं तेऽन्वयं कृत्वा मह्यं संदर्शयत्वपि ।
कर्तुं येषां न सामर्थ्यमस्ति ते नृपसन्निधौ ।।
टिट्टिभस्य प्रकारेण प्रारटन्तु कुचेष्टया ।
कुचेष्टाकरणादिष्टं न कस्यापि प्रजायते ।।

277. Rājopayoginī paddhatiḥ

राजोपयोगिनी पद्धतिः

Author :—Rāmasiṁhadeva, son of Mahārājadhirāja Sri Jayasiṁhadeva.

Foll. 18; 27×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 5; letters per line 16; 1741 V.S. (1684 A.D.); written at Jamrud by Rāmanātha.

Begins :— ।। **श्रीगणेशाय नमः** ।।

विनायकं विभुं रामं गुरुं नत्वा समासतः ।
नित्यानुष्ठानसरणिं स्वोपयोगितयाऽरभे ।।१।।

Ends : – दृष्ट्वा भाष्यं निबन्धांश्च मन्वादींश्च स्मृतीरपि ।
पद्धती रचिता सेयं नाम्ना राजोपयोगिनी ।।

इति श्रीमहाराजाधिराजश्रीजयसिंहदेवात्मजश्रीरामसिंहदेवविरचिता राजोपयोगिनी पद्धतिः समाप्तिमगमत् ।। संवत् १७४१ ।। ज्येष्ठशुक्लषष्ठ्यां लिखितमिदं पुस्तकं ।। श्रीमहाराजाधिराजश्रीरामसिंहदेवाज्ञया श्रीरामनाथेन ।। मु. जमरोज ।। श्री रामः ।।

279. Rajopayoginī paddhatiḥ

राजोपयोगिनी पद्धतिः

Author :—as above.

Foll. 31; 24.5×11 cms.; paper; Devanāgarī script; Sanskirt; lines per page 4; letters per line 22; 1732 V. S. (1675 A. D.); written with black, red and golden inks within rectangles with golden borders and decorated on margins.

Scribe—Rāmakṛṣṇa

340. Rajopayogini paddhatiḥ

राजपयोगिनी पद्धतिः

Author and text as above.

Foll. 11; 27×11 cms.; paper; Devanāgarī script: Sanskrit: lines per page 8; letters per line 36; 18th c.

335. Rājyābhiṣekapaddhatiḥ

राज्याभिषेकपद्धतिः

Also called जयाभिषेकप्रयोगः (Jayābhiṣekaprayogaḥ)

Author :—Raghunātha Śarmā

Foll. 23; 28×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 35; 1724 V. S. (1667 A. D.); bears a seal of M. K. Ram Singh.

Begins :—श्री (ग) णे (शा) य (न) मः (II)

(Space for letters within brackets has been left blank.)

श्रीरामविघ्नेशगजाननादीन् प्रणम्य मातापितरौ गुरूंश्च ।
परोपकाराय जयाभिषेकविधिं विधत्ते रघुनाथशर्मा ॥

Ends— ॥ इति जयाभिषेकप्रयोगः ॥ (with red ink)

अशुद्धभावादिह पुस्तकानां क्वचित्तथा निर्वचनाद्यभावात् ।
स्याद्देवतानामसु चेत् प्रमादः सद्भिः सुरैश्चैवम मेष सह्यः ॥१॥
हेमाद्रिग्रन्थमालोच्य लैङ्गं ग्रन्थान्तराणि च ।
अङ्गानि चोपसंहृत्य कर्मान्तरगतान्यपि ॥
अपेक्षितोऽपि सन्न्यायैरभ्यूह्य च विनिर्मितः ।
भट्टरायेशविप्राग्र्यसुतमाधवसूनुना ॥

On the margin: —रघुनाथेन लोकानामुपकृत्यै समासतः ।
जयाभिषेकसम्बन्धिप्रयोगक्रमसङ्ग्रहः ॥
संवत् १७२४ कार्तिक कृ०नवम्यामलेखि ॥

376. Rāmajanmābhiṣekavidhiḥ

रामजन्माभिषेकविधिः

Foll. 5; 29.5×13.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 14; letters per line 39/40; 18th c.; incomplete.

Begins :— श्री राम जनम अवषेष विधि ।।

देशिकः स तु विज्ञेया [यः] संसारार्णवतारकः ।
पाञ्चरात्रप्रबुद्धस्तु सिद्धान्तार्थः स तत्त्ववित् ।।

Ends : — यथामूलमात्रमुच्चार्य श्रीरामाय पुष्पादिकं निवेदयामीति पठन् दद्यात्
महो गन्धः शिला धान्यं दूर्वा पुष्पं फलं दधि ।
घृतं स्वस्तिकसिन्दूरं शङ्खकज्जलरोचनाः ।
सिद्धान्नं काञ्चनं रौप्यं ताम्रं सिद्धार्थदर्पणौ ।।
दीपः प्रशस्तपात्रं च व........................(incomplete.)

336. Rudravidhānam

रुद्रविधानम्

Foll. 13; 28×11 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 36; 1734 V. S. (1677 A. D.); bears seals of M. K. Ram Singh.

Begins :— ।। श्रीगणेशाय नमः ।।

ऋषिभिरुपलक्षितवाक्यमृषिभिश्च्छन्दोभिरुपलक्षिता देवता मन्त्रवर्णा ऋग्यजुषोर्विनियोगश्च विज्ञेयाः ।

Ends :—इति रुद्रविधानं सम्पूर्णम् ।। ❀ ।। शुभमस्तु । संवत् १७३४ भाद्रपदमासे कृष्णपक्षे अमावस्यायां शनौ ।। लिखितमिदं पुस्तकं श्रीरामनाथशर्मणा ।। मुकाम हकीमाबाद ।। श्रीरस्तु ।। श्रीरामचन्द्राय नमः ।।

Hakimabad may be a place in N. W. F. where the Mahārājā was on deputation in 1677 A. D. His favourite scribe Rāmanātha Śarmā was also with him as usual.

185. Varṇāśramachandrikā

वर्णाश्रमचन्द्रिका

Foll. 25; 35×13 cms.; paper; Devanāgarī script; Sanskrit; lines per page 13; letters per line 58; 19th c.; damaged copy.

Begins :— श्रीगणेशाय नमः ।। शुभमस्तु ।। वर्णाश्रमचन्द्रिका ।।
क्षेमधारां गणाध्यक्षः कृपया वितनोतु नः ।
दानधाराऽलिसङ्घेभ्यः संततं येन दीयते ।।

षट्त्रिंशत्तत्वसौधस्थं तदन्तर्व्यापिनं प्रभुम् ।
वन्दे वर्णाश्रमचन्द्रिकाकृतये परं शिवम् ।।

Ends :— तस्मादेव विधिर्वानप्रस्थापर एवाथवाऽसौ वाऽजन्मब्रह्मचारी परः तस्य यतिशब्दत्ववाच्यत्वेन च साधकाभावात् ।।
याद्दशं...............

।। श्रीविश्वेश्वराय नमः ।।

331. Vandhyāgarbhajananavidhiḥ

वन्ध्यागर्भजननविधिः

Foll. 15; 22×11.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 8; letters per line 36/38; 18th c.; incomplete.

Begins :—कोषाच्च प्रसवसमये विनिर्गताः षोडशवर्षपर्यन्तं बालव्यपदेशं भजन्ते ।। गर्भश्च स्त्रीपुरुषकृतजन्मान्तरदुष्कर्मवशान्न जायते । ये चैवंविधाः पुरुषाश्च स्त्रियः ते सर्वे वन्ध्याव्यपदेशभाजो भवन्ति । अतो वन्ध्यानामपि गर्भसंजननाय वन्ध्याभिषेकादिविधिः प्रथममभिधीयते ।।

After dealing with the religious purifications the writer has given some medicinal prescriptions.

on f. 15 (a) वंशनिम्बयोस्त्वक् तुलसीमूलं कपित्थपत्रं करञ्जबीजमिति एनत्समेत्य तत्समतोलितं कल्कमजाक्षीरेण शृतं कृत्वा तैलेन... ....

(incomplete)

328. Vāpīkūpataḍāgotsargavidhiḥ

वापीकूपतड़ागोत्सर्गविधिः

Author—Kamalākara Bhaṭṭaḥ

Foll. 3; 22×10.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 10; letters per line 32; 18th c.

253. Vāsiṣṭhī Śāntiḥ

वासिष्ठी शांतिः

Foll. 24; 22×11 cms;. paper; Devanāgarī script; Sanskrit; lines per page 8/9; letters per line 24; old; 1672 V.S. (1615 A. D.); bears two seals of M. K. Ram Singh dt. 1718 V. S. (1661 A D.)

Begins :— ॥ **श्रीगणेशाय नमः** ॥ अथातो गृह्स्थालीपाकानां कर्म........

Ends :— माध्यन्दिनी तु या शाखा सर्वसाधारणी स्मृता ।
साऽनुकूला ग्रहास्तस्या सर्वकालं भवन्ति ते ॥
ग्रन्थ संख्या २०३३ ॥
इति श्रीवसिष्ठेन प्रोक्ता ग्रहशान्तिरियं समाप्ता ॥

